८.अष्टमः पाठः

मम दिनचर्या

समयः- घटिकायन्त्रेण

मम नाम दिनेशः । अहं प्रातः काले पञ्चवादने उत्तिष्ठामि । अनन्तरं दन्तधावनं करोमि । मुखप्रक्षालनं करोमि । प्रातःस्मरणं करोमि । षड्वादने सूर्यनमस्कारं करोमि । सप्तवादने स्नानं करोमि । अनन्तरं पाठं पठामि । गृहकार्यं करोमि । अष्टवादने अल्पाहारं स्वीकरोमि । नववादने विद्यालयं गच्छामि । तत्र पाठान् पठामि ।

मध्याह्ने सार्धद्वादशवादने भोजनं करोमि । सायङ्काले सार्धचतुर्वादने क्रीडाङ्गणे क्रीडामि । सपादषड्वादने आगच्छामि । रात्रौ सपादसप्तवादने भोजनं करोमि । अनन्तरं पादनोदशवादनपर्यन्तं पाठान् पठामि । दशवादने शयनं करोमि ।

रमेश ! त्वं कदा उत्तिष्ठसि ? अहं सार्धपञ्चवादने उत्तिष्ठामि । शारदा कदा अल्पाहारं स्वीकरोति ? शारदा पादोन-अष्टवादने अल्पाहारं स्वीकरोति । बालाः कदा विद्यालयं गच्छन्ति ? बालाः सपादनववादने विद्यालयं गच्छन्ति । सायङ्काले सपादचतुर्वादने विद्यालयस्य घण्टा नदति । वयं पादोनषड्वादने गृहं गच्छामः ।